# NĀTYAŚĀSTRA TRADITIONS

**SKT1 C02**

# I SEMESTER

**CORE COURSE**

**M.A. SANSKRIT(GENERAL)**

**(2019 Admission onwards)**

**CBCSS**


***UNIVERSITY OF CALICUT***

***School of Distance Education,***

***Calicut University P.O.***

***Malappuram - 673 635, Kerala.***


**190202**

**UNIVERSITY OF CALICUT**

**SCHOOL OF DISTANCE EDUCATION**

Study material

I SEMESTER

M.A SANSKRIT GENERAL

2019 ADMISSION

CORE COURSE

SKT 1 CO2 NĀTYAŚĀSTRA TRADITIONS

***Prepared by:***

***Dr. K. INDIRA,***

*AssistantProfessor on contract in Sanskrit,*

*School ofDistance Education, University of Calicut*

***Scrutinized by:***

***Dr. PUSHPADASAN KUNIYIL,***

*Associate Professor & Director,*

*SreeSankaracharya University of Sanskrit,*

*Regional campus, Koyilandy.*

***DISCLAIMER***

"The author shall be solely responsible for the content and views expressed in this book"

# SKT 1 CO2 NĀTYAŚĀSTRA TRADITIONS

Unit I: General study of Nāṭyaśāstra Text

- History of discovery and publication: Baroda Edition- Kasi Edition- Ramakrishna Kavi- Kavyamala Edition etc.
- Synoptical survey of Contents
- Translations and commentaries
- A general survey and assessment of *Abhinavabharati*

Unit II: Intensive study of *Naṭyasastra* chapter VI with *Abhinavabharati*

Unit III: Intensive study of *Dasarupaka* Chapter III

Unit I:

नाट्यशास्त्रम् इति एकः प्राचीनग्रन्थः द्विसहस्रवर्षेभ्य पूर्वमेव भरताचार्येण कृतः अस्ति । तस्मिन् ग्रन्थे सः नाट्यस्वरूपं नाटकलक्षणं च सम्यक् उक्तवा धनञ्जयः नामकः पण्डितः 'दशरूपकम्' इति ग्रन्थं विलिख्य रूपकाणां परिचयं कारितवान् । नाट्यं भिन्नरुचेर्जनस्य बहुधाऽप्येकं समाराधनम् (कालिदासः, मालविकाग्निमित्रनाटके)।

प्रथमं कविना गद्यपद , सम्भाषणात्मकः, अभिनययोग्यः कश्चन ग्रन्थः लिख्यते। तत्रत्या कथा रामायणादिषु प्रसिद्धा वा भवे , कविकल्पिता वा भवेत। सः ग्रन्थः नटैः र अभिनीयते। एषः अभिन , 'प्रयोगः' इति कथ्यत । सहृदया सामाजिकाः तं दृष्ट्वा आनन्दमनुभव । नाटके चतुर्विधा अभिनयाः भवन्ति - आङ्गिकः, वाचिकः, आहार्यकः, सात्त्विकः चेति। हस्तपादनेत्रादिभिः यः अभिनयः क्रियते सः आङ्गि कः। भाषणं वाचिकः। वेषभूषणादिकम् आहार्यकः। गात्रकम्पनम्, स्वेदः इत्यादयः सात्त्विकाभिनयाः। एतादृशैः अभिनयैः नटाः प्रेक्षकेषु अष्ट रसान् उत्पादयन्ति।

संस्कृतनाटकेषु प्रथमम् एकं मङ्गलपद्यं भवति। 'नान्दी' इति तस्य म। तदनन्तरं सूत्रधारः प्रवि । सः नाटके अभिनेष्यमाणायाः कथायाः सूचनां ददाति। तदनन्तरं नाटकस्य प्रारम्भः भवति । संस्कृतनाटके उत्तमजनाः संस्कृतेन, नीचजनाः स्त्रियः च प्राकृतेन भाषन्ते। रङ्गे जलपा , भोजनं, अग्निः, युद्धम् इत्येतादृशाः विषयाः न दर्शनीयाः इति नियमः अस्ति। नाटकस्य अन्ते एकः श्लोकः भवति । प्रायः नायक एव इमं श्लोकं पठति। अस्मिन् श्लोके 'लोकाः समस्ताः सुखिनो भवन्तु' इत्येतादृशम् अर्थपूर्णं मङ्गलाशंसनं भवति । अस्य श्लोकस्य 'भरतवाक्यम्' इति नाम।

भारतदेशस्य संस्कृतवाङ्मयस्य च कीर्तिसौध आधारस्तम्भा इव चत्वारः भरतनामानः कीर्तिशेषाः श्रूयन्ते। तेषु प्रथमः दुष्यन्तपुत्रः भरतः। द्वितीयः बाहूबलिसोदरः भरतः। तृतीयः श्रीरामस्य अनुजः भरतः। चतुर्थस्तु नाट्यशास्त्रम् इत्येतद्ग्रन्थस्य कर्ता भरतमुनिः । एवं चतुर्णाम् एतेषां भरतानां जन्मभूमिः, कर्मभूमिः च योऽयं देशः वर्ते भारतम् इति यथार्थाभिधानम् भजते। तथैव भरतमुनिना प्रणीतं भारतीयं नाट्यशास्त्रम् भवति। नाट्यवेदः इति नाट्यशास्त्रस्य पुरातनं नाम बभूव, यथा-

वेदोपवेदैः संबद्धो नाट्यवेदो महात्मना
एवं भगवता सृष्टो ब्रह्मणा सर्ववेदिना ॥ ना.शा.१.१८. ।

तथा च नाट्यं वेदैरेव उपबृंहितमिति भरतः निरूपयति, यथा -

जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसानाथर्वणादपि ॥ ना.शा.१.१७ ।

भारते प्रागैतिहासिके क " नाट्यवेदः" द्वादशसहस्रश्लोकात्मकः बृहद्गात्रः प्रसिद्धिं : , उपलब्धश्च आसीदिति ज्ञायते। क्रिस्तात् पूर्वस्मिन् सहस्राब्दे भरतमुनिन पुरातननाट्यवेदात् सारमुद्धृत्य षट्सहस्रैः श्ल ,षट्त्रिंश दध्यायैः नाट्यशास्त्रं निबद्धम्। शास्त्रमिदं न केवलं रङ्गकर्मनिर्देशने प्रवृत्तम्, नृत्य-गीत-वाद्य-साहित्यादीनां कलामूलानां शास्त्राणामपि महोपकारकं वर्तते। सङ्गीतादिशास्त्रग्रन्थाः एतच्छास्त्रम् अनूद्य एव प्रवृत्ताः इति न सन्देहः। अपि च भारतीयेषु अन्यान्यनाट्यप्रभेदेष्वपि भरतनाट्यशास्त्रे निरूपिताः नियमाः एव प्रवर्तन्ते।

अभिनया रामादीनाम् अवस्थाया अनुकरणम्। स च तावत् चतुर्विधः, तथाहि - रामादौ गमनादिक्रिया वर्तत , वाक्यम्,

वेषभूषणादिकं बाह्यस्वरूपम्, क्रोधहासादिः आन्तरो धर्मः। अनुकरणं च एतावतामेव नान्येषा । तत्र गमनादिक्रियाया अनुकरणं न हस्तपादादिभिः अङ्गैः क्रिय । तस्मात् स अभिनर 'आङ्गिकः'। वाक्यस्य अनुकरणं वाचा क्रिर । तस्मात् स अभिनय 'वाचिकः'। बाह्यस्वरूपस्य अनुकरणं वेषभूषणादिना त्रि । तस्मात् अभिनयः 'आहार्यः'। हासक्रोधादे अनुकरणं मुखविकासादिना क्रियते। तस्माच्च स अभिनयः 'सात्त्विकः'। तदेवमभिनयस्य चतुर्विधत्वम्। तत्र रामादिः अनुकार्य , नटः अनुकर्ता, तेन च रामादेः अनुकरणमिति अंशत्रयं स्पष्ठम्।

शृङ्गारादीनां रसानाम् अभिव्यञ्जनपराणां र शास्त्रग्रन्थानाम् आधारभूतं प्रामाणिकं च शास्त्रं भारतमुनिकृ 'नाट्यशास्त्रम्'। अत्र आदौ पञ्चसु अध्यायेषु क्रमेण १) नाट्योत्पत्ति २) मण्टपविधानम् ३) रङ्गदैवतपूजाविधानम् ४) ताण्डवलक्षणम ५) पूर्वरङ्गविधानम् इति विषयान् सविस्तरं विविच्य भरतः षष्ठेऽध्याये रसान् अमूलाग्रं । अस्मिन्नध्याये नारद भरतमुनिमुद्दिश्य रसभावस द्धान् पञ्च प्रश्नान् पृ । ततः भरतः तान् प्रश्नान् उत्तरन् रर , भावः, अभिनयः, धर्मी, वृत्तिः, प्रवृत्तिः, सिद्धिः, स्वरः, आतोद्यम्, गानम्, रङ्गं च व्यवृणोत्। ततः शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-बीभत्स-अद्भुतरसान् च अष्टै रसान् नाट्योपयुक्तान् न्यरूप । नाट्ये रसनिष्पत्तिहेतू भावादीनभीधाय ततः वदति यत्-

> तत्र रसानेव तावदादौ अभिव्याख्यास्यामः॥ इति प्रतिज्ञाप्य, न हि रसादृते कश्चिदर्थः प्रवर्तते ।इति वदन् नाट्येषु रसम् ऋते अर्थ एव नास्तीति निर्वचनं करोति। तदनन्तरम "रससूत्रम्" एवमभिधत्ते
>
> विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः ।इति ।

एवं रससूत्रनिर्माणानन्तरं शास्त्रकारः "को दृष्टान्त ?" इति स्वयमेव पृच्छामुद्घाट्य, अग्रे विवृणोति यथा -

यथा हि गुडादिभिः द्रव्यैः व्यञ्जनैः औषधिभिश्च षाडवादयो रसाः निर्वर्त्यन्ते, तथा नाना भावोपगता अपि स्थायिनः भावाः रसत्वम् आप्नुवन्ति। अस्यायमाशयः, अत्र दृष्टान्ते विभावादीनां विवेचना प्रसिद्धैः गुडादिभिः निरूप् । अत्र गुडादयः षट् रसपदार्थाः विभावः, अनुभावः, सञ्चारिभावश्च इति ज्ञेयम्। जलं स्थायिभाव इ कल्पनीयम्। एवं च स्थायिभावेन दीनां सम्मेलनं रसोत्पत्तिकारणम्। रसोत्पत्यनन्तरं भोक्तृणामिव प्रेक्ष सामाजिकानां आनन्दानुभूतिः, रसास्वादश्च भवति। अतो भरतोऽभिदधाति -

आस्वादयोग्यः पदार्थसंयोग एव रसः इति ।

बुभुक्षितः जनः यथा मधुरादिभी रसैः मिश्रम् अन आस्वाद्य आनन्दम् अनुभ , तथा सहृदयः नाट्येषु पात्राणाम् (रामादीनाम्) आङ्गिकैः, आहार्यैः, वाग्व्यापारैश्च सुखे दुःखे विस्मयादिषु च तादात्म्येन आनन्दमनुभवति। सामान्यतः श्रव्ये काव्येषु स्वयम् अप्रवृत्तानां स्थायिभावरहितानाम् अरसिकानामपि हृद्येषु स्थायिभावस्य जागरणं नाट्येन कर्तुं शक्यते। अत्र नट आख्यायिकापुरुषस्य स्वभावाभिनयेन गम्यः स्थायिभावः, (द्रष्टरि च विद्यमानः) चमत्कारेण रसत्वं प्रा । नटे (रामादौ) स्थायिभावोऽस्त्येव इति कः भावयति। एवम्द्वयोः समानतया उत्पन्नः स्थायिभाव एव रसनिष्पत्तिपर्यन्तम् नि , अविच्छिन्नधा या स्यन्दमानः रसात्मतया परिणम । इममेव विषयम् "अभिनवगुप्त" अभिनवभारत्यां व्याख्यायां व्याचष्टे। यथा -

"प्रतीयमानः स्थायिभावः मुख्यरामादिरूपस्थाय्यनुकरणरूपः, अनुकरणरूपत्वादेव च नामान्तरेण व्यपदिष्टो रसः" इति ।

शृङ्गारादीनां अष्टनामपि रसानां प्रत्येकतया "स्थायिभावान्" निर्दिशति, यथा -

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।

जुगुप्सा विस्मयश्चेति स्थायिभावः प्रकीर्तितः ॥ इति ।

एवं शृङ्गाररसस्य स्थायि रतिः, हास्यरसस्य हासः, वीरस्य उत्साहः, करुणरसस्य शोकः, रौद्ररसस्य क्रोधः भयानकस्य भयम्,

बीभत्सरसस्य जुगुप्सा, अद्भुतरसस्य विस्मयः स्थायिभावः भवति इति वदति। ततः भावाः निरुच्यन्ते । भावलक्षणम्, यथा -

वागङ्गसत्वोपेतान् काव्यर्थान् भावयन्ति इति भावाः । इति।

यद्यपि "भाव"शब्दस्य अनेके अर्थाः ॰ षु दृश्यन्त । तथापि अत्र भावनिरूपणे भावः नाम चित्तवृत्तिः इत्यर्थं स्वीकरोति। तथा "विभावः" नाम निमित्तम् इत्यर्थे भावयति। वस्तुतः भावस्य निष्पत्तिकारणम् भ र्भावहेतुः "विभावः" इति कथ्य । यथा अभिज्ञानशाकुन्तले शकुन्तलायाः तपो रतिस्थायिभावस्य उद्दीपनहेतुः दुष्यन्तः आलम्बनविभाव भवति। तथैव स्वचित्तगतविषयान् भ्रूविक्षेपादिभिः प्रटनम् एव अनुभावः। आहत्य अष्टविधान् अनुभावान् सङ्ख्यापयति भरतः, यथा -

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।

वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्विकाः स्मृताः ॥ इति ।

तथा च प्रवर्तमाने स्थायिभावे आनुषङ्गिकतया मध्ये अन्यभावानाम् आगमनिर्गमौ सञ्चारिभाव अथवा व्यभिचरिभाव इति कथ्यते । भरतः नाट्यानुगता ३३ सञ्चारिभावान् उल्लिखति महाभारतस्य विषये यदुक्तम्- यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् इति तथैव नाट्यशास्त्रविषयेऽपि भरतेन अभिहितम् यथा -

न तच्छ्रुतं न तच्छिल्पं न सा विद्या न सा कला ।

न स योगो न तत् कर्म यन्नाट्येऽस्मिन्न दृश्यते ।
ना.शा.१/११६

एवम् सर्वाः शिक्षाः, सर्वाणि शिल्पानि, लौकिकाः कलाः, विद्याः, सकलविधं च कर्म नाट्ये दृश्यरूपेण प्रदर्शयितुं शक्यते इति भावः। नाट्यम् आबालब्रह्म रससरस्सन्निभम् लोकान् रञ्जयति इत्यर्थः । एतस्मात् ज्ञायते , भरतमुनिकृतं नाट्यशास्त्रमिदम् सर्वजनपदकलाशास्त्राणां मूलाधारमिति नात्युक्तिः। भरतादपि पूर्वस्मिन् कोहलः दत्तिलः नाट्यशास्त्रग्रन्थान् रचयामासतुरिति श्रूयते। तत्र दत्तिलस्य ग्रन्थनाम "दत्तिलम्" इति। ततः श्रीमता आनन्दवर्धने ध्वन्यालोकः इति साहित्यशास्त्रस्य यः लक्षणग्रन्थः रचि , तत्र 'ध्वनि'लक्षणं लक्षयति यथ- "अनुरणनं ध्वनिः" इति। 'अनुरणनं नाम नाट्यम् इत्यर्थः। आचार्यः मम्मटः स्वीये काव्यलक्षणग्रन्थे काव्यप्रकाशः नाम्नि भरतमुनिकृतात् नाट्यशास्त्रादेव कारिकाः समुद्धृत्य ग्रन्थम् आरचितवान्। तथा च दण्डी निजकृतौ "काव्यादर्शे"ऽपि भरतनाट्यशास्त्रीयान् श्लोकान् उ भरतकृतनाट्यशास्त्रे षाष्ठतमाध्यायगतां रसनिष्पत्तिप्रक्रि विशदयितुं प्रयतितवत्सु व्याख्यानकर्तृषु अभिनवगुप्तः प्रमुखः। अभिनवगुप्तस्य व्याख्यानग्रन्थस्य न "अभिनवभारती" इति। भट्टतौतः नाम कश्चन लाक्षणिकः काव्यस्य रसास्वादविष नाट्यशास्त्रम् आधारीकृत्य काव्यकौतुकम् नामकं ग्रन्थं रचित । तथा च नाट्यशास्त्राधारितेषु ग्रन्थेषु ३यशतमाने ख्यातः नन्दितः नामा अभिनयदर्पणम् नाम ग्रन्थं व्यर । एवम् सोमन नाट्यचूडामणिम्, रामचन्द्रगुणाचार्यः नाट्यसर्पणम्, अशोकमल्लः नृत्याध्यायम्, जयसेनः नृत्यरत्नावलि , नान्यदेवः भरतभाष्य , अल्लराजः रसतत्वसमुच्चयम्, श्रीकण्ठकविः रसकौमुदीम्, अन्ये च अनेके नाट्येषु, नाट्यभेदेषु, देशीसङ्गीतेषु, राग-ताल-भावादिविषयेषु

नाना कलाविषयेषु च भरतस्य "नाट्यशास्त्रात" सामग्रीः सम्पाद्य एव लिलेखुः इत्यत्र नास्ति सन्देह । इदमपि ज्ञेयम् यत् पूर्वम् नाट्यस्य शिल्पम् इति ।
अतः शिल्पशास्त्रम् अथवा स्थापत्यशास्त्रम् अपि
भारतनाट्यशा मनुकृत्य एव समैधत इति भाव्यम्। एवं च यथा काणादं पाणिनीयं च सर्वशास्त्रोपकारकम् इति लोकोक्तिः विद्यते तथैव नाट्यशास्त्रमिदं सर्वकलाशास्त्रोपकारकम् इत्युक्ते नातिभाषितं भवेत्।

दशरूपकग्रन्थः (Dasharoopaka) यद्यपि नाट्यशास्त्रग्रन्थः तथापि तत्र चतुर्थप्रकाश रससिद्धान्तस्य विषये वर्तते। आस्मिन् ग्रन्थे प्राकाशचतुष्टयं विद्यन्ते । ३०० कारिकाः सन्ति । नाटवं , प्रकरणम् एवं रूपकाणि विवृतानि इत्यतः दशरूपकम् इति नाम आगतम्।

- प्रथमप्रकाशे नृत्यानि, सन्धयः,अर्थप्रकृतयः विवृतानि ।
- द्वितीयप्रकाशे नायक-नायिकयोर्लक्षणम् विद्यते ।
- तृतीयप्रकाशे दशरूपकाणि वर्णितानि ।
- चतुर्थे प्रकाशे रसः विवृतः ।

Unit II: Intensive study of *Naṭyasastra* chapter VI with *Abhinavabharati*

# नाट्यशास्त्रम् अध्यायः ६

॥ श्रीरस्तु ॥

भरतमुनिप्रणीतं नाट्यशास्त्रम्
अथ षष्ठोऽध्यायः ।
पूर्वरङ्गविधिं श्रुत्वापुनराहुर्महत्तमाः ।
भरतं मुनयः सर्वे प्रश्नान्पञ्चाभिधत्स्व नः ॥ १॥

ये रसा इति पठ्यन्ते नाट्ये नाट्यविचक्षणैः ।
रसत्वं केन वै तेषामेतदाख्यातुमर्हसि ॥ २॥

भावाश्चैव कथं प्रोक्ताः किं वा ते भावयन्त्यपि ।
संग्रहं कारिकां चैव निरुक्तं चैव तत्वतः ॥ ३॥

तेषां तु वचनं श्रुत्वा मुनीनां भरतो मुनिः ।
प्रत्युवाच पुनर्वाक्यं रसभावविकल्पनम् ॥ ४॥

अहं वः कथयिष्यामि निखिलेन तपोधनाः ।
संग्रहं कारिकां चैव निरुक्तं च यथाक्रमम् ॥ ५॥

न शक्यमस्य नाट्यस्य गन्तुमन्तं कथञ्चन ।
कस्माद्बहुत्वाज्ज्ञानानां शिल्पानां वाप्यनन्ततः ॥ ६॥

एकस्यापि न वै शक्यस्त्वन्तो ज्ञानार्णवस्य हि ।
गन्तुं किं पुनरन्येषां ज्ञानानामर्थतत्त्वतः ॥ ७॥

किन्त्वल्पसूत्रग्रन्थार्थमनुमानप्रसाधकम् ।
नाट्यस्यास्य प्रवक्ष्यामि रसभावादिसङ्ग्रहम् ॥ ८॥

विस्तरेणोपदिष्टानामर्थानां सूत्रभाष्ययोः ।
निबन्धो यो समासेन सङ्ग्रहं तं विदुर्बुधाः ॥ ९॥

रसा भावा ह्यभिनयाः धर्मी वृत्तिप्रवृत्तयः ।
सिद्धिः स्वरास्तथातोद्यं गानं रङ्गश्च सङ्ग्रहः ॥ १०॥

अल्पाभिधानेनार्थो यः समासेनोच्यते बुधैः ।
सूत्रतः साऽनुमतव्या कारिकार्थप्रदर्शिनी ॥ ११॥

नानानामाश्रयोत्पन्नं निघण्टुनिगमान्वितम् ।
धात्वर्थहेतुसंयुक्तं नानासिद्धान्तसाधितम् ॥ १२॥

स्थापितोऽर्थो भवेद्यत्र समासेनार्थासूचकः ।
धात्वर्थवचनेनेह निरुक्तं तत्प्रचक्षते ॥ १३॥

सङ्ग्रहो यो मया प्रोक्तः समासेन द्विजोत्तमाः ।
विस्तरं तस्य वक्ष्यामि सनिरुक्तं सकारिकम् ॥ १४॥

शृङ्गारहास्यकरुणा रौद्रवीरभयानकाः
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥ १५॥

एते ह्यष्टौ रसाः प्रोक्ता द्रुहिनेन महात्मना ।
पुनश्च भावान्वक्ष्यामि स्थायिसञ्चारिसत्त्वजान् ॥ १६॥

रतिहासश्च शोकश्च क्रोधोत्साहौ भयं तथा
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥ १७॥

निर्वेदग्लानिशङ्काख्यास्तथासूया मदः श्रमः ।
आलस्यं चैव दैन्यं च चिन्तामोहः स्मृतिर्धृतिः ॥ १८॥

व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च । १९॥

सुप्तं विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥ २०॥

त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः ॥ २१॥

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभेदोऽथ वेपथुः ।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्विकाः स्मृताः ॥ २२॥

आङ्गिकौ वाचिकश्चैव ह्याहार्यः सात्विकस्तथा ।
चत्वारोऽभिनया ह्येते विज्ञेया नाट्यसंश्रयाः ॥ २३॥

लोकधर्मी नाट्यधर्मी धर्मीति द्विविधः स्मृतः ।
भारती सात्वती चैव कैशिक्यारभटी तथा ॥ २४॥

चतस्रो वृत्तयो ह्येता यासु नाट्यं प्रतिष्ठितम् ।
आवन्ती दाक्षिणात्या च तथा चैवोढ्रमागधी ॥ २५॥

पाञ्चालमध्यमा चेति विज्ञेयास्तु प्रवृत्तयः ।
दैविकी मानुषी चैव सिद्धिः स्याद्द्विविधैव तु ॥ २६॥

शारीराश्चैव वैणाश्च सप्त षड्जादयः स्वराः ।
[निषादर्षभगान्धारमध्यपञ्चमधैवताः ॥]
ततं चैवावनद्धं च घनं सुषिरमेव च ॥ २७॥

चतुर्विधं च विज्ञेयमातोद्यं लक्षणान्वितम् ।
ततं तन्त्रीगतं ज्ञेयमवनद्धं तु पौष्करम् । २८॥

घनस्तु तालो विज्ञेयः सुषिरो वंश एव च
प्रवेशाक्षेपनिष्क्रामप्रासादिकमथान्तरम् ॥२९॥

गानं पञ्चविधं ज्ञेयं ध्रुवायोगसमन्वितम्
चतुरस्रो विकृष्टश्च रङ्गस्त्र्यश्रश्च कीर्तितः ॥ ३०॥

एवमेषोऽल्पसूत्रार्थो निर्दिष्टो नाट्यसंग्रहः ।
अतः परं प्रवक्ष्यामि सूत्रग्रन्थविकल्पनम् ॥ ३१॥

तत्र रसानेव तावदादावभिव्याख्यास्यामः । न हि रसादृते कश्चिदर्थः प्रवर्तते ।

तत्र विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः ।
को दृष्टान्तः । अत्राह - यथा हि
नानाव्यञ्जनौषधिद्रव्यसंयोगाद्रसनिष्पत्तिः तथा
नानाभावोपगमाद्रसनिष्पत्तिः । यथा हि -
गुडादिभिर्द्रव्यैर्व्यञ्जनैरौषधिभिश्च षाडवादयो रसा
निर्वर्त्यन्ते
तथा नानाभावोपगता अपि स्थायिनो भावा
रसत्वमाप्नुवन्तीति ।
अत्राह - रस इति कः पदार्थः । उच्यते - आस्वाद्यत्वात्
।
कथमास्वाद्यते रसः ।
यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जान
रसानास्वादयन्ति
सुमनसः पुरुष हर्षादींश्चाधिगच्छन्ति तथा
नानाभावाभिनयव्यञ्जितान् वागङ्गसत्तोपेतान्
स्थायिभावानास्वादयन्ति सुमनसः प्रेक्षकाः
हर्षादींश्चाधिगच्छन्ति । तस्मान्नाट्यरसा
इत्यभिव्याख्याताः ।
अत्रानुवंश्यौ श्लोकौ भवतः -
यथा बहुद्रव्ययुतैर्व्यञ्जनैर्बहुभिर्युतम् ।
आस्वादयन्ति भुञ्जाना भक्तं भक्तविदो जनाः ॥ ३२॥

भावाभिनयसंबद्धान्स्थायिभावांस्तथा बुधाः ।
आस्वादयन्ति मनसा तस्मान्नाट्यरसाः स्मृताः ॥ ३३॥

अत्राह - किं रसेभ्यो भावानामभिनिर्वृत्तिरुताहो भावेभ्यो रसानामिति । केषाञ्चिन्मतं परस्परसम्बन्धादेषामभिनिर्वृत्तिरिति । तन्न । कस्मात् । दृश्यते हि भावेभ्यो रसानामभिनिर्वृत्तिर्न तु रसेभ्यो भावानामभिनिर्वृत्तिरिति । भवन्ति चात्र श्लोकाः -

नानाभिनयसम्बद्धान्भावयन्ति रसनिमान् ।
यस्मात्तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः ॥ ३४॥

नानाद्रव्यैबहुविधैर्व्यञ्जनं भाव्यते यथा
एवं भावा भावयन्ति रसानभिनयैः सह ॥ ३५॥

न भावहीनोऽस्ति रसो न भावो रसवर्जितः ।
परस्परकृता सिद्धिस्तयोरभिनये भवेत् ॥ ३६॥

व्यञ्जनौषधिसंयोगो यथान्नं स्वादुतां नयेत् ।

एवं भावा रसाश्चैव भावयन्ति परस्परम् ॥ ३७॥

यथा बीजाद्भवेद्वृक्षो वृक्षात्पुष्पं फलं यथा ।
तथा मूलं रसाः सर्वे तेभ्यो भावा व्यवस्थिताः ॥ ३८॥

तदेषं रसानामुत्पत्तिवर्णदैवतनिदर्शनान्यभिव्याख्यास्यामः
।
तेषामुत्पत्तिहेतवश्चत्वारो रसाः । तद्यथा - शृङ्गारो
रौद्रौ वीरो बीभत्स इति । अत्र -
शृङ्गाराद्धि भवेद्धास्यो रौद्राच्च करुणो रसः ।
वीराच्चैवाद्भुतोत्पत्तिर्बीभत्साच्च भयानकः ॥ ३९॥

शृङ्गारानुकृतिर्या तु स हास्यस्तु प्रकीर्तितः ।
रौद्रस्यैव च यत्कर्म स ज्ञेयः करुणो रसः ॥ ४०॥

वीरस्यापि च यत्कर्म सोऽद्भुतः परिकीर्तितः ।
बीभत्सदर्शनं यच्च ज्ञेयः स तु भयानकः ॥ ४१॥

अथ वर्णाः -
श्यामो भवति शृङ्गारः सितो हास्यः प्रकीर्तितः ।
कपोतः करुणश्चैव रक्तो रौद्रः प्रकीर्तितः ॥ ४२॥

गौरो वीरस्तु विज्ञेयः कृष्णश्चैव भयानकः ।
नीलवर्णस्तु बीभत्सः पीतश्चैवाद्भुतः स्मृतः ॥ ४३॥

अथ दैवतानि -
शृङ्गारो विष्णुदेवत्यो हास्यः प्रमथदैवतः ।
रौद्रो रुद्राधिदैवत्यः करुणो यमदैवतः ॥ ४४॥

बीभत्सस्य महाकालः कालदेवो भयानकः ।
वीरो महेन्द्रदेवः स्यादद्भुतो ब्रह्मदैवतः ॥ ४५॥

एतमेतेषां रसानामुत्पत्तिवर्णदैवतान्यभिव्याख्यातानि ।
इदानीमनुभावविभावव्यभिचारिसंयुक्तानां
लक्षणनिदर्शनान्यभिव्याख्यास्यामः । स्थायिभावांश्च
रसत्वमुपनेष्यामः ।
तत्र शृङ्गारो नाम रतिस्थायिभावप्रभवः ।
उज्ज्वलवेषात्मकः ।
यत्किञ्चिल्लोके शुचि मेध्यमुज्ज्वलं दर्शनीयं वा
तच्छृङ्गारेणोपमीयते ।
यस्तावदुज्ज्वलवेषः स शृङ्गारवानित्युच्यते । यथा च

गोत्रकुलाचारोत्पन्नान्याप्तोपदेशसिद्धानि पुंसां नामानि भवन्ति

तथैवेषां रसानां भावानां च नाट्याश्रितानां चार्थानामाचारोत्पन्नान्योप्तोपदेशसिद्धानि नामानि ।

एवमेष आचारसिद्धो हृद्योज्ज्वलवेषात्मकत्वाच्छृङ्गारो रसः।

स च स्त्रीपुरुषहेतुक उत्तमयुवप्रकृतिः ।

तस्य द्वे अधिष्ठाने सम्भोगो विप्रलम्भश्च । तत्र सम्भोगस्तावत्

ऋतुमाल्यानुलेपनालङ्कारेष्टजनविषयवरभवनोपभोगोपवन-गमनानुभवनश्रवणदर्शनक्रीडालीलादिभिर्विभावैरुत्पद्यते।

तस्य नयनचातुर्यभ्रूक्षेपकटाक्षसञ्चारललितमधुराङ्गहार-वाक्यादिभिरनुभावैरभिनयः प्रयोक्तव्यः ।

व्यभिचारिणश्चास्यालस्यौग्र्यजुगुप्सावर्ज्याः ।

विप्रलम्भकृतस्तु निर्वेदग्लानिशङ्कासूयाश्रमचिन्तौत्सुक्यनिद्रास्वप्नविबोध व्याध्युन्माद-मदापस्मारजाड्यमरणादिभिरनुभावैरभिनेतव्यः ।

अत्राह - यद्ययं रतिप्रभवः शृङ्गारः कथमस्य करुणाश्रयिणो

भावा भवन्ति ।

अत्रोच्यते - पूर्वमेवाभिहितं सम्भोगविप्रलम्भकृतः शृङ्गार इति ।

वैशिकशास्त्रकारैश्च दशावस्थोऽभिहितः । ताश्च सामान्याभिनये वक्ष्यामः ।

करुणस्तु शापक्लेशविनिपतितेष्टजनविभवनाशवधबन्धसमुत्थो निरपेक्षभावः ।

औत्सुक्यचिन्तासमुत्थः सापेक्षभावो विप्रलम्भकृतः ।

एवमन्यः करुणोऽन्यश्च विप्रलम्भ इति । एवमेष सर्वभावसंयुक्तः शृङ्गारो भवति । अपि च

सुखप्रायेषु सम्पन्नः ऋतुमाल्यदिसेवक

पुरुषः प्रमदायुक्तः शृङ्गार इति संज्ञितः ॥ ४६॥

अपि चात्र सूत्रार्थानुविद्धे आर्ये भवतः ।

ऋतुमाल्यालङ्कारैः प्रियजनगान्धर्वकाव्यसेवाभिः ।

उपवनगमनविहारैः शृङ्गाररसः समुद्भवति ॥ ४७॥

नयनवदनप्रसादैः स्मितमधुरवचोधृतिप्रमोदैश्च ।

मधुरैश्चाङ्गविहारैस्तस्याभिनयः प्रयोक्तव्यः ॥ ४८॥

अथ हास्यो नाम हासस्थायिभावात्मकः । स

विकृतपरवेषालङ्कारधार्ष्ट्यलौल्यकुहकासत्प्रलापव्यङ्गदर्शन
-
दोषोदाहरणादिभिर्विभावैरुत्पद्यते ।
तस्योष्ठनासाकपोलस्पन्दन-
दृष्टिव्याकोशाकुञ्चनस्वेदास्यरागपार्श्वग्रहणादिभिरनुभावैर
भिनयः
प्रयोक्तव्यः ।
व्यभिचारिणश्चास्यावहित्थालस्यतन्द्रानिद्रास्वप्नप्रबोधादयः
।
द्विविधश्चायमात्मस्थः परस्थश्च । यदा स्वयं हसति
तदाऽत्मस्थः
यदा तु परं हासयति तदा परस्थः ।
अत्रानुवंश्ये आर्ये भवतः ।
विपरितालङ्कारैर्विकृताचराभिधानवेषैश्च ।
विकृतैरर्थविशेषैर्हसतीति रसः स्मृतो हास्यः ॥ ४९॥

विकृताचारैर्वाक्यैरङ्गविकारैश्च विकृतवेषैश्च ।
हासयति जनं यस्मात्तस्मज्ज्ज्ञेयो रसो हास्यः ।५०॥

स्त्रीनीचप्रकृतावेष भूयिष्ठं दृश्यते रसः ।
षड्भेदाश्चास्य विज्ञेयास्तांश्च वक्ष्याम्यहं पुनः ॥ ५१॥

स्मितमथ हसितं विहसितमुपहसितं चापहसितमतिहसितम्
।
द्वौ द्वौ भेदौ स्यातामुत्तममध्याधमप्रकृतौ ५२॥

तत्र
स्मितहसिते ज्येष्ठानां मध्यानां विहसितोपहसिते च ।
अधमानामपहसितं ह्यतिहसितं चापि विज्ञेयम् ॥ ५३॥

अत्र श्लोकाः -
ईषद्विकसितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः ।
अलक्षितद्विजं धीरमुत्तमानां स्मितं भवेत् ॥ ५४॥

उत्फुल्लाननेत्रं तु गण्डैर्विकसितैरथ ।
किञ्चिल्लक्षितदन्तं च हसितं तद्विधीयते ॥ ५५॥

अथ मध्यमानाम् -
आकुञ्चिताक्षिगण्डं यत्सस्वनं मधुरं तथा
कालागतं सास्यरागं तद्वै विहसितं भवेत्॥५६॥

उत्फुल्लनासिकं यत्तु जिह्मदृष्टिनिरीक्षितम् ।

निकुञ्चिताङ्गकशिरस्तच्चोपहसितं भवेत्     ५७॥

अथाधमानाम् -

अस्थानहसितं यत्तु साश्रुनेत्रं तथैव च ।
उत्कम्पितांसकशिरस्तच्चापहसिअतं भवेत् ॥ ५८॥

संरब्धसाश्रुनेत्रं च विकृष्टस्वरमुद्धतम् ।
करोपगूढपार्श्वं च तच्चातिहसितं भवेत् ॥ ५९॥

हास्यस्थानानि यानि स्युः कार्योत्पन्नानि नाटके ।
उत्तमाधममध्यानामेवं तानि प्रयोजये     ॥ ६०॥

इत्येष स्वसमुत्थस्तथा परसमुत्थश्च विज्ञेयः
द्विविधस्त्रिप्रकृतिगतस्त्र्यवस्थभावो रसो हास्यः ॥ ६१॥

अथ करुणो नाम शोकस्थायिभावप्रभवः । स च
शापक्लेशविनिपतितेष्टजनविप्रयोगविभवनाशवधबन्धविद्रवो
पघात-
व्यसनसंयोगादिभिर्विभावैः समुपजायते ।
तस्याश्रुपातपरिदेवनमुखशोषणवैवर्ण्यस्रस्तगात्रतानिश्श्वास-
स्मृतिलोपादिभिरनुभावैरभिनयः प्रयोक्तव्यः ।

व्यभिचारिणश्चास्य
निर्वेदग्लानिचिन्तौत्सुक्यावेगभ्रममोहश्रमभयविषाददैन्यव्याधि-
जडतोन्मादापस्मारत्रासालस्यमरणस्तम्भवेपथुवैवर्ण्याश्रु-
स्वरभेदादयः ।
अत्रार्ये भवतः -
इष्टवधदर्शनाद्वा विप्रियवचनस्य संश्रवाद्वापि ।
एभिर्भावविशेषैः करुणो नाम संभवति ॥ ६२॥

सस्वनरुदितैर्मोहागमैश्च परिदैवतैर्विलपितैश्च ।
अभिनेयः करुणरसो देहायासाभिघातैश्च ॥ ६३॥

अथ रौद्रो नाम क्रोधस्थायिभावात्मको
रक्षोदानवोद्धतमनुष्यप्रकृतिः
संग्रामहेतुकः । स च
क्रोधाधर्षणाधिक्षेपानृतवचनोपघातवाक्पा-
रुष्याभिद्रोहमात्सर्यादिभिर्विभावैरुत्पद्यते । तस्य च
ताडनपाटनपीडाच्छेदनप्रहरणाहरणशस्त्रसम्पातसम्प्रहाररुधिराकर्षणाद्यानि
कर्माणि । पुनश्च
रक्तनयनभ्रुकुटिकरणदन्तोष्ठपीडनगण्डस्फुरण-

हस्ताग्रनिष्पेषादिरनुभावैरभिनयः प्रयोक्तव्यः ।

भावाश्चास्यासम्मोहोत्साहावेगामर्षचपलतौग्र्यगर्वस्वेदवेपथुरोमाञ्च-
गद्गदादयः ।
अत्राह - यदभिहितं रक्षोदानवादीनां रौद्रो रसः ।
किमन्येषां नास्ति । उच्यते -
अस्त्यन्येषामपि रौद्रो रसः । किन्त्वधिकारोऽत्र गृह्यते ।
ते हि
स्वभावत
एव रौद्रः । कस्मात् ।
बहुबाहवो बहुमुखाः प्रोद्धूतविकीर्णपिङ्गलशिरोजाः ।
रक्तोद्वृत्तविलोचना भीमासितरूपिणश्चैव ।
यच्च किञ्चित्समारम्भते स्वभावचेष्टितं वागङ्गादिकं
तत्सर्वं रौद्रमेवैषाम् । शृङ्गारश्च तैः प्रायशः
प्रसभ्यं सेव्यते । तेषां
चानुकारिणो ये पुरुषस्तेषामपि सङ्ग्रामसम्प्रहारकृतो रौद्रो
रसोऽनुमन्तव्यः ।
अत्रानुवंश्ये आर्ये भवतः -
युद्धप्रहारघातनविकृतच्छेदनविदारणैश्चैव ।
संङ्ग्रामसम्भ्रमाद्यैरेभिः सञ्जायते रौद्रः ॥ ६४॥

नानाप्रहरणमोक्षैः शिरःकबन्धभुजकर्तनैश्चैव ।
एभिश्चार्थविशेषैरस्याभिनयः प्रयोक्तव्यः ॥ ६५॥

इति रौद्ररसो दृष्टो रौद्रवागङ्गचेष्टितः ।
शस्त्रप्रहारभूयिष्ठ उग्रकर्मक्रियात्मकः ॥ ६६॥

अथ वीरो नामोत्तमप्रकृतिरुत्साहात्मकः । स चासंमोहाध्यवसायन-विनयबलपराक्रमशक्तिप्रतापप्रभावादिभिर्विभावैरुत्पद्यते । तस्य स्थैर्यधैर्यशौर्यत्यागवैशारद्यादिभिरनुभावैरभिनयः प्रयोक्तव्यः । भावाश्चास्य धृतिमतिगर्वावेगौग्र्यामर्षस्मृतिरोमाञ्चादयः ।

अत्रार्ये रसविचारमुखे -
उत्साहाध्यवसायादविषादित्वादविस्मयामोहात् ।
विविधादर्थविशेषाद्वीररसो नाम सम्भवति ॥ ६७॥

स्थितिधैर्यवीर्यगर्वैरुत्साहपराक्रमप्रभावैश्च ।
वाक्यैश्चाक्षेपकृतैर्वीररसः सम्यगभिनेयः ॥ ६८॥

अथ भयानको नाम भयस्थायिभावात्मकः । स च
विकृतरवसत्त्वदर्शनशिवोलूकत्रासोद्वेगशून्यागारारण्यगमन
स्वजनवधबन्ध-
दर्शनश्रुतिकथादिभिर्विभावैरुत्पद्यते ।तस्य
प्रवेपितकरचरणनयनचपलपुलकमुखवैवर्ण्यस्वरभेदादिभिरनु
भावैरभिनयः
प्रयोक्तव्यः ।
भावाश्चास्य
स्तम्भस्वेदगद्गदरोमाञ्चवेपथुस्वरभेदवैवर्ण्यशङ्कामोहदै
न्यावेग-
चापलजडतात्रासापस्मारमरणादयः ।
अत्रार्याः -
विकृतरवसत्त्वदर्शनसंग्रामारण्यशून्यगृहगमनात् ।
गुरुनृपयोरपराधात्कृतकश्च भयानको ज्ञेयः 

गात्रमुखदृष्टिभेदैरूरुस्तम्भाभिर्व क्षणोद्वेगैः ।
सन्नमुखशोषहृदयस्पन्दनरोमोद्गमैश्च भयम् ॥ ७०

एतत्स्वभावजं स्यात्सत्त्वसमुत्थं तथैव कर्तव्यम् ।
पुनरेभिरेव भावैः कृतकं मृदुचेष्टितैः कार्यम् ॥७१॥

करचरणवेपथुस्तम्भगात्रहृदयप्रकम्पेन ।
शुष्कोष्ठतालुकण्ठैर्भयानको नित्यमभिनेयः ॥ ७२॥

अथ बीभत्सो नाम जुगुप्सास्थायिभावात्मकः । स चाहृद्याप्रियाचोष्यानिष्टश्रवणदर्शनकीर्तनादिभिर्विभावैरुत्पद्यते। तस्य सर्वाङ्गसंहारमुखविकूणनोल्लेखननिष्ठीवनोद्वेजनादिभिरनुभावैरभिनयः प्रयोक्तव्यः
भावाश्चास्यापस्मारोद्वेगावेगमोहव्याधिमरणादयः ।
अत्रानुवंश्ये आर्ये भवतः -
अनभिमतदर्शनेन च गन्धरसस्पर्शशब्ददोषैश्च ।
उद्वेजनैश्च बहुभिर्बीभत्सरसः समुद्भवति ॥ ७३॥

मुखनेत्रविकूणनया नासाप्रच्छादनावनमितास्यैः
अव्यक्तपादपतनैर्बीभत्सः सम्यगभिनेयः ॥ ७४॥

अथाद्भुतो नाम विस्मयस्थायिभावात्मकः । स च दिव्यजनदर्शनेप्सितमनोरथावाप्त्युपवनदेवकुलादिगमनसभाविमान-मायेन्द्रजालसम्भावनादिभिर्विभावैरुत्पद्यते । तस्य

नयनविस्तारानिमेषप्रेक्षणरोमाञ्चाश्रुस्वेदहर्षसाधुवाददानप्रब
न्ध-
हाहाकारबाहुवदनचेलाङ्गुलिभ्रमणादिभिरनुभावैरभिनयः
प्रयोक्तव्यः। भावाश्चास्य
स्तम्भाश्रुस्वेदगद्गदरोमाञ्चावेगसम्भ्रमजडताप्रलयादयः
अत्रानुवंश्ये आर्ये भवतः -

यत्त्वातिशयार्थयुक्तं वाक्यं शिल्पं च कर्मरूपं वा ।
तत्सर्वमद्भुतरसे विभावरूपं हि विज्ञेयम् ॥ ७५॥

स्पर्शग्रहोल्लुकसनैर्हाहाकारैश्च साधुवादैश्च ।
वेपथुगद्गदवचनैः स्वेदाद्यैरभिनयस्तस्य ॥ ७□□

□ङ्गारं त्रिविधं विद्यात्द्वाङ्नैपथ्यक्रियात्मकम् ।
अङ्गनैपथ्यवाक्यैश्च हास्यरौद्रौ त्रिधा स्मृतौ ॥ ७७॥

धर्मोपघातजश्चैव तथार्थापचयोद्भवः ।
तथा शोककृतश्चैव करुणस्त्रिविधः स्मृतः ॥ □□□

दानवीरं धर्मवीरं युद्धवीरं तथैव च ।
□□□□रमपि प्राह ब्रह्मा त्रिविधमेव हि ॥ ७९॥

व्याजाच्चैवापराधाच्च वित्रासितकमेव च ।
पुनर्भयानकञ्चैव विद्यात् त्रिविधमेव हि ॥ ८०॥

बीभत्सः क्षोभजः शुद्ध उद्वेगी स्यात् द्वितीयकः ।
विष्ठाकृमिभिरुद्वेगी क्षोभजो रुधिरादिअजः ॥ ८१॥

दिव्यश्चानन्दजश्चैव द्विधा ख्यातोऽद्भुतो रसः ।
दिव्यदर्शनजो दिव्यो हर्षादानदजः स्मृतः ॥ ८२॥
[ अथ शान्तो नाम शमस्थायिभावात्मको मोक्षप्रवर्तकः ।
□ □□
तत्त्वज्ञानवैराग्याशयशुद्ध्यादिभिर्विभावैः समुत्पद्यते ।
तस्य
यमनियमाध्यात्मध्यानधारणोपासनसर्वभूतदयालिङ्गग्रहणा
दिभि-
रनुभावैरभिनयः प्रयोक्तव्यः । व्यभिचाणश्चास्य
निर्वेदस्मृतिधृतिसर्वाश्रमशौचस्तम्भरोमाञ्चादयः ।
अत्रार्याः श्लोकाश्च भवन्ति -
मोक्षाध्यात्मसमुत्थस्तत्त्वज्ञानार्थहेतुसंयुक्तः ।
नैःश्रेयसोपदिष्टः शान्तरसो नाम सम्भवति ॥

बुद्धीन्द्रियकर्मेन्द्रियसंरोधाध्यात्मसंस्थितोपेतः ।

सर्वप्राणिसुखहितः शान्तरसो नाम विज्ञेयः

न यत्र दुःखं न सुखं न द्वेषो नापि मत्सरः ।
समः सर्वेषु भूतेषु स शान्तः प्रथितो रसः

भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः ।
विकारः प्रकृतैर्जातः पुनस्तत्रैव लीयते ।
स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते ॥

पुनर्निमित्तापाये च शान्त एवोपलीयते ।
एवं नवरसा दृष्टा नाट्यज्ञैर्लक्षणान्विअताः ॥]
एवमेते रसा ज्ञेयास्त्वष्टौ लक्षणलक्षिताः ।
अत ऊर्ध्वं प्रवक्ष्यामि भावानामपि लक्षणम् ॥ ८३॥
इति भारतीये नाट्यशास्त्रे रसाध्यायः षष्ठः ॥

****

Unit III: Intensive study of *Dasarupaka* Chapter III

## तृतीयः प्रकाशः।

बहुवक्तव्यतया रसविचारातिलङ्घनेन वस्तुनेतृरसानां विभज्य नाटकादिषूपयोगः प्रतिपैंद्यते-

**प्रकृतित्वादथान्येषां भूयो रसपरिग्रहात्।**

**संपूर्णलक्षणत्याच्च पूर्वं नाटकमुच्यते।। १।।**

उद्दिष्टधर्मकं हि नाटकमनुद्दिष्टधर्माणां प्रङ्करणादीनां प्रकृतिः। शेषं प्रतीतम्।

तत्र-

**पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते।**

**प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः।।२।।**

पूर्व रज्यतेऽस्मिँन्नति पूर्वरङ्गो नाट्यशाला। तत्स्थप्रथमप्रयोगव्यत्थापनादौ पूर्वरङ्गता। तं विधाय विनिर्गते प्रथमं सूत्रधारे तद्वदेव वैष्णवस्थानकादिना प्रविश्यान्यो नटः काव्यार्थं स्थापयेत्। स च काव्यार्थस्थापनात्सूचनात्स्थापकः।

**दिव्यमर्त्ये स तद्रूपो मिश्रमन्यतरस्तयोः।**

**सूचयेद्वस्तु बीजं वा मुखंपात्रमथापि वा।।३।।**

स स्थापको दिव्यं वस्तु दिव्यो भूत्वा मर्त्यं च मर्त्यरूपो भत्वा मिश्रं च दिव्यमर्त्ययोरन्यतरो भत्वा सूचयेत्। वस्तु बीजं मुखं पात्रं वा। वस्तु यथोदात्तराघवे-

'रामो मूर्ध्नि निधाय काननमगान्मालामिवाज्ञां गुरो-

स्तद्भड़त्या भरतेन राज्यमखिलं मात्रा सहैवोज्झितम्।

तौ सुग्रीवविभीषणावनुगतौ नीतौ परां संपदं

प्रोद्वृता दशकन्धरप्रभतयो ध्वस्ताः समस्ता द्विषः।।'

बीजं यथा रत्नावल्याम्-

द्वीपादन्यस्मादपि मध्यादपि नलनिधेर्दिशोऽप्यन्तात्।

आनीय झटिति घटयति विधिरभिमतमभिमुखीभतः।।

मुखं यथा-

आसादितप्रङ्क टनिर्मलचन्द्रहासः

प्राप्तः शरत्समय एष विशुद्धकान्तः।

उत्खाय गाढतमसं घनकालमुग्रं

रामो दशास्यमिव संभृतबन्धुजीवः।।

पात्रं यथा शाकुन्तले-

‘तवास्मि गीतरामेण हारिणा प्रसभं हृतः।

एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा।।’

**रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः।**

**ऋतुं कंचिदुपादाय भारतीं वृत्तिमाश्रयेत्।। ४।।**

रङ्गस्य प्रशस्तिं काव्यार्थानुगतार्थैः श्लोकैः कृत्वा-

औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया

तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुक्यं पुनः।

दृष्ट्वाग्रे वरमात्तसाध्लसरसा गौरी नवे संगमे

संरोहत्पुलका हरेण हसता श्लिष्टा शिवा पातु वः।।

इत्यादिभिरेव भारतीं वृत्तिमाश्रयेत्।

सा तु-

**भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः।**

**भेदैः प्ररोचनायुक्तैर्वीथीप्रहसनामुखैः।।५।।**

पुरुषविशेषप्रयोज्यः संस्कृतबहुलो वाक्यप्रधानो नटाश्रयो व्यापारो भारती। प्ररोचना वीथीप्रहसनामुखानि चास्यामङ्गानि।

यथोद्देशं लक्षणमाह-

**उन्मुखीकरणं तत्र प्रशंसातः प्ररोचना।**

प्रस्तुतार्थप्रशंसनेन श्रोतृणां प्रवृत्त्युन्मुखीकरणं प्ररोचना। यथा रत्नावल्याम्-

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी

लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम्।

वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-

र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः।।

**बीधी प्रहसनं चापि स्वप्रसङ्गेऽभिधास्यते।।६।।**

**वीथ्यङ्गान्यामुखाङ्गत्वादुच्यन्तेऽत्रैव तत्पुनः।**

**सूत्रधारो नटीं ब्रूते मार्षे वाथ विदूषकम्।।७।।**

**स्वकार्यं प्रस्तुताक्षेपि चित्रोकत्या यत्तदामुखम्।**

**प्रस्तावना वा तत्र स्युः कथोद्धातः प्रवृत्तकम्।।८।।**

**प्रयोगातिशयश्चाथ वीथ्यङ्गानि त्रयोदश।**

तत्र कथोद्धातः-

**स्वेतिवृत्तसमं वाक्यमर्थं वा यत्र सूत्रिणः।।९।।**

**गृहीत्वा प्रविशेत्पात्रं कथोद्धातो द्विधैव सः।।**

वाक्यं यथा रत्नावल्याम्- **यौगंधरायणः-** द्वीपादन्यस्मादपि- इति।

वाक्यार्थं यथा वेणीसंहारे- **भीमः-**

निर्वाणवैरिदहनाः प्रशमादरीणां

नन्दन्तु पाण्डुतनयाः सह केशवेन।

रक्तप्रसाधितभुवः क्षतविग्रहाश्च

स्वस्था भवन्तु कुरुराजसुताः सभृत्याः।।

ततोऽर्थेनाह- भीमः-

लाक्षागृहानलविषान्नसभाप्रवेशैः

प्राणेषु वित्तनिचयेषु च नः प्रहृत्य।

आकृष्टपाण्ववधूपरिधानकोशाः

स्वस्था भवन्तु मयि जीवति धार्तृपाष्ट्राः।।

अथ प्रवृत्तकम्-

**कालसाम्यसमाक्षिप्तप्रवेशः स्यात्प्रवृत्तकम्।।१०।।**

प्रवृत्तकालसमानगुणवर्णनया सूचितपात्रप्रवेशः प्रवृत्तकम्। यथा-

आसादितप्रकचनिर्मलचन्द्रहासः

प्राप्तः शरत्समय एष विशुद्धकान्तः।

उत्खाय गाढतमसं घनकालमुग्रं

रामो दशास्यमिव संभृतबन्धुजीवः।।

(ततः प्रविशति यथानिर्दिष्टो रामः)

अथ प्रयोगातिशयः-

**एषोऽयमित्युपक्षेपात्सूत्रधारप्रयोगतः।**

**पात्रप्रवेशो यत्रैष प्रयोगातिशयो मतः।।११।।**

यथा- एष राजेव दुष्यन्तः इति।

अथ वीथ्यङ्गानि-

**उद्घात्यकावलगिते प्रपञ्चत्रिगते छलम्।**

**वाक्केल्यधिवले गण्डमवस्यन्दितनालिके।।१२।।**

**असत्प्रलापव्याहारमृदवानि त्रयोदश।**

तत्र-

**गूढार्थपदपर्यायमाला प्रश्नोत्तरस्य वा।।१३।।**

**यत्रान्योन्यं समालापो द्वेधोद्धात्यं तदुच्यते।**

गूढार्थं पदं तत्पर्यायश्चेत्येवं माला। प्रश्नोत्तरं चेत्येवं वा माला। द्वयोरुक्तिप्रत्युक्तौ तद्द्विविधमुद्धात्यकम्। तत्राद्यं विक्रमोर्वश्यां यथा- **विदूषकः-** भो वअस्स, को एसो कामो जेण तुमं पि दूमिज्जसे। सो किं पुरिसो आदु इत्थिअ त्ति (भो वयस्य, क एष कामो देन त्वमपि दूयसे। स किं पुरुषोऽथवा स्त्रीति। इति च्छाया)। **राजा-** सखे,

मनोजातिरनाधीना सुखेष्वेव प्रवर्तते।

स्त्रोहस्य ललितो मार्गः काम इत्यभिधीयते।।

**विदूषकः-** एवं पि ण जाणे (एवमपि न जानामि।)। **राजा** - वयस्य, इच्छाप्रभवः स इति। **विदूषकः-** किं जो जं इच्छदि सो तं कामेदिति (किं यो यदिच्छति स तत्कामयतीति।)। **राजा** - अथ किम्। **विदूषकः-** तां जाणिदं जह अहं सूअआरसालाए भोअणं इच्छामि (तज्ज्ञातं यथाहं सूपकारशालायां भोजनमिच्छामि। )।

अथावलगितम्-

**यत्रैकत्र समावेशात्कार्यमन्यत्परसाध्यते।।१४।।**

**प्रस्तुतेऽन्यत्र वान्यत्स्यात्तच्चावलगितं द्विधा।**

तत्राद्यं यथोत्तरचरिते समुत्पन्नवनविहारगर्भदोहदायाः सीताया दोहदकार्येऽनुप्रविश्य जनापवादादरण्ये त्यागः। द्वितीयं यथा छलितरामे- **रामः** - लक्ष्मण, तात वियुक्तामयोध्यां विमानस्थो नाहं प्रवेष्टुं शक्नोमि। तदवतीर्य गच्छामि।

कोऽपि सिंहासनस्याधः स्थितः पादुकयोः पुरः।

जटावानक्षमाली च चामरी च विराजते।।

इति भरतदर्शनकार्यसिद्धिः।

अथ प्रपञ्चः-

**असद्भूतं मिथःस्तोत्रं प्रपञ्चो हास्यकृन्मतः।।१५।।**

असद्भूतेनार्थेन पारदार्यादिनैपुण्यादिना यान्योन्यस्तुतिः स प्रपच्चः। यथा कर्पूरमञ्जर्याम्- भैरवानन्दः-

रण्डा चण्डा दीक्षिता धर्मदारा मद्यं मांसं पीयते खाद्यते च।

भिक्षा भोज्यं चर्मखण्डं च शप्या कीलो धर्मः कस्य न भवति रम्यः।।

अथ त्रिगतम्-

**श्रुतिसाम्याजनेकार्थयोजनं त्रिगतं त्विह।**

**नटादित्रितयालापः पूर्वरङ्गे तदिष्यते।। १६।।**

यथा विक्रमोर्वश्याम्-

मत्तानां कुसुमरसेन षट्पदानां

शब्दोऽयं परभृतनाद एष धीरः।

कैलासे सुरगणसेविते समन्ता-

त्किन्नर्यः कलमधुराक्षरं प्रगीताः।।

अथ छलमनम्-

प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य छलनाच्छलम्।

यथा वेणीसंहारे - भीमार्जुनौ-

कर्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽभिमानी

राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रम्।

कृष्णाकेशोत्तरीयव्यपनयनपटुः पाण्डवा यस्य दासाः

क्वास्ते दुर्योधनोऽसौ कथयत पुरुषा द्रष्टुमभ्यागतौ स्वः।।

अथ वाक्केली-

**विनिवृत्त्यास्य वाक्केली द्विस्त्रिः प्रत्युक्तितोऽपि वा।।१७।।**

अस्येति वाक्यस्य प्रक्रान्तस्य साकाङ्क्षस्य विनिवर्तनं वाक्केली। द्वित्रिर्वा उक्तिप्रत्युक्तयः। तत्राद्या यथोत्तरचरिते - वासन्ती-

त्वं जीवितं त्वमसि मे हृदयं द्वितीयं

त्वं कौमुदी नयनयोमृतं त्वमङ्गे।

इत्यादिभिः प्रियशतैरनुध्य मुग्धां

तामेव शान्तमथवा किमतः परेण।।

उक्तिप्रत्युक्तितो यथा रत्नावल्याम्- **विदूषकः-** भवति मदनिके, मामप्येतां चर्चरीं शिक्षय। **मदनिका-** हताश, न खल्येषा

चर्चरी। द्विपदीखण्डकं खल्वेतत्। **विदूषकः-** भवति, किमेतेन खण्डेन मोदकाः क्रियन्ते। **मदनिका-** नहि। पट्यते खल्वेतत्। इत्यादि।

अथाधिबलम्-

अन्योन्यवाक्याधिक्योक्तिः स्पर्धयाधिवलं भवेत्।

यथा वेणीसंहारे- **अर्जुनः-**

सकलरिपुजयाशा यत्र बद्धा सुतैस्ते
तृणमिव परिभूतो यस्य गर्वेण लोकः।
रणशिरसि निहन्ता तस्य राधासुतस्य
प्रणमति पितरौ वां मध्यमः पाण्डुपुत्रः।।

इत्युपक्रमे **राजा**- अरे, नाहं भवानिव विङ्कत्थनाप्रगल्भः। किंतु।

द्रक्ष्यन्ति न चिरात्सुप्तं बान्धवात्वां रणाङ्गणे।
मद्गदाभिन्नवक्षोऽस्थिवेणिकाभङ्गभीषणम्।।

इत्यन्तेन भीमदुर्योधनयोरन्योन्यवाक्यस्याधिक्योक्तिरधिबलम्।

अथ गण्डः-

**गण्डः प्रस्तुतसंबन्धिभिन्नार्थं सहसोदितम्।।१८।।**

यथोत्तरचरिते - **रामः** -

इयं गेहे लक्ष्मीरियममतवॅतर्नयनयो-

रसावस्याः स्पर्शो वपुषि बहलश्चन्दनरसः।

अयं बाहुः कण्ठे शिशिरमसृणो मैंक्तिकसरः

किमस्या न प्रेयो यदि परमसह्यस्तु विरहः।।

(प्रविश्य।) **प्रतीहारी** – देव, उपस्थितः। रामः- अयि, कः। प्रतीहारी-देवस्यासन्नपरिचारको दुर्मुखः। इति।

अथावस्यन्दितम्-

रसोक्तस्यान्यथा व्याख्या यत्रावस्यन्दितं हि तत्।

यथा छलितरामे - **सीता**- जात,कल्यं खलु युवाभ्यामयोध्यायां गन्तव्यम्। तर्हि स राजा विनयेन नमितव्यः। **लवः-** अम्ब, किमावाभ्यां राजोपजीविभ्यां भवितव्यम्। **सीता**- जात, स खलु

युवयोः पिता।। **लवः-** किमावयो रघुपतिः पिता। **सीता-** (सशङ्कम्।) जात, न खलु परं युवयोः। सकलाया एव पृथिव्याः। इति।

अथ नालिका-

**सोपहासा निगूढार्था नालिकैव प्रहेलिका।। १९।।**

यथा मुद्राराक्षसे – **चरः-** हंहो ब्राह्मण, मा कप्य। किमपि तवोपाध्यायो जानाति। किमप्यस्मादृशा जना जानन्ति। **शिष्यः** - किमस्मदुपाध्यायस्य सर्वज्ञत्वमपहर्तुमिच्छसि। **चरः** - यदि त उपाध्यायः सर्वं जानाति तज्जानातु तावत्कस्य चन्दरोऽनभिप्रेत इति। **शिष्यः-** किमनेन ज्ञाचेन भवति। इत्युपक्रमे चाणक्यः- चन्द्रगुप्तादपरक्तान्पुरुपाञ्जानामि। इत्युक्तं भवति।

अथासत्प्रलापः-

**असंबद्धकथाप्रायोऽसत्प्रलापो यथोत्तरः।**

ननु चासंबद्धार्थत्वेऽसंगतिर्नाम वाक्यदोप उक्तः। तन्न। उत्स्वप्नायितमदोन्मादशैशवादीनामसंबद्धप्रलापितैव विभावः। यथा-

अर्चिष्मन्ति विदार्य वक्त्रकुहराण्यासुक्कतो वासुकेरङ्गुल्या विषकर्बुरान्गणयतः संस्पृश्य जन्ताङ्कुरान्।

एकं त्रीणि नवाष्ट सप्त षडिति प्रध्वस्तसंख्याक्रमा

वाचः क्रौञ्चरिपोः शिशुत्वविकलाः श्रेयांसि पुष्णन्तु वः।।

अथ व्याहारः-

**अन्यार्थमेव व्याहारो हास्यलोभकरं वचः।।२०।।**

यथा मालविकाग्निमित्रे लास्यप्रयोगावसाने- (मालविका निर्गन्तुमिच्छति) **विदूषकः** - मा तावत्। उपदेशशुद्धा गमिष्यसि। इत्युपक्रमे **गणदासः-** (विदूषकं प्रति) आर्य, उच्यतां यस्त्वया क्रमभेदो लक्षितः। **विदूषकः-** प्रथमं प्रत्यूषे ब्राह्मणस्य पूजा भवति। सा तया लङ्घिता। (मालविका स्मयते)। इत्यादिना नायकस्य विश्रब्धनायिकादर्शनप्रयुक्तेन हास्यलोभकारिणा वचनेन व्याहारः।

अथ मृदवम्-

**दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत्।**

यथा शाकुन्तले-

मेदश्छेदकृशोदरं लघु भवत्यत्थानयोग्यं वपुः

सत्वानामपलक्ष्यते विकृतिमच्चितं भयक्रोधयोः।

उत्कर्षः स च धन्विनां यदिपवः सिध्यन्ति लक्ष्ये चले

मिथ्यैव व्यसनं वदन्ति मृगयाम दृग्विनोदः कुतः।।

इति मृगयादोषस्य गुणीकारः।

**एषामन्यतमेनार्थं पात्रं चाक्षिप्य सूत्रभत्।।२१।।**

**प्रस्तावनान्ते निर्गच्छेत्ततो वस्तु प्रपञ्चयेत्।**

तत्र-

**अभिगम्यगुणैर्युक्तो धीरोदात्तः प्रतापवान्।।२२।।**

**कीर्तिकामो महोत्साहस्त्रय्यास्त्राता महीपतिः।**

**प्रख्यातवंशो राजर्षिर्दिव्यो वा यत्र नायकः।।२३।।**

**तत्प्रख्यातं विघातव्यं वृत्तमत्राधिकारिकम्।**

यत्रेतिवृत्ते सत्यवागसंवादकारिनातिशास्त्रप्रसिद्धाभिगामिकादि-गुणयक्तो रामायणमहाभारतादिप्रसिद्धो धीरोदात्तो राजर्षिर्दिव्यो वा नायकस्तत्प्रख्यातमेवात्र नाटक आधिकारिकं वस्तु विधेयमिति।

**यत्तत्रानुचितं किंचिन्नायकस्य रसस्य वा।।२४।।**

**विरुद्धं तत्परित्याज्यमन्यथा वा प्रकल्पयेत्।**

यथा छझना बालिवधो मायुराजेनोदात्तराघवे परित्यक्तः।

वारचरिते तु रावणसौहृदेन वाली रामवधार्थमागतो रामेण हत इत्यन्यथा कृतः।

**आद्यन्तमेवं निश्चित्य पञ्चधा तद्विभज्य च।।२५।।**

**खण्डशः संधिसंज्ञांश्च विभागानपि खण्डयेत्।**

अनौचित्यरसविरोधपरिहारपरिशुद्धीकृतसूचनीयदर्शनीयवस्त - विभागफलानुसारेणोपक्लुप्तबीजबिन्दुपताकाप्रकरीकार्यलणार्थप्रकृतिकं पञ्चावस्थानुगुण्येन पञ्चधा विभजेत्। पुनरपि चैकैकस्य भागस्य द्वादश त्रयोदश चतुर्दशेत्येवमङ्गसंज्ञानां संघीनां विभागान्कुर्यात्।

**चतुःषष्टिस्तु तानि स्युरङ्गानीत्यपरं तथा।।२६।।**

**पताकावृत्तमप्यूनमेकाद्यैरनुसंधिभिः।**

**अङ्गान्यत्र यथालाभमसंधिं प्रकरीं न्यसेत्।।२७।।**

अपरमपि प्रासङ्गिकमितिवृत्तमेकाद्यैरनुसंधिभिर्न्यूनमिति प्रधानेतिवृत्तादेकद्वित्रिचतुर्भिरनुसंधिभिर्नूनं पताकेतिवृत्तं न्यसनीयम्। अङ्गानि च प्रधानाविरोधे यथालाभं न्यसनीयानि। प्रकरीतिवृत्तं त्वपरिपूर्णसंधि विधेयम्।

तत्रैवं विभक्ते-

**आदौ विष्कम्भकं कर्यादङ्कं वा कार्ययुक्तितः।**

इयमत्र कार्ययुक्तिः।

**अपेक्षितं परित्यज्य नीरसं वस्तुविस्तरम्।।२८।।**

**यदा संदर्शयेच्छेपं कुर्याद्विष्कम्भकं तदा।**

**यदा तु सरसं वस्तु मूलादेव प्रवर्तते।।२९।।**

**आदावेव तदाङ्कः स्यादामुखाक्षेपसंश्रयः।**

स च-

**प्रत्यक्षनेतृचरितो बिन्दुप्याप्तिपुरस्कतः।।३०।।**

**अङ्को नानाप्रकारार्थसंविधानरसाश्रयः।**

रङ्गप्रवेशे साक्षान्निर्दिश्यमाननायकव्यापारो बिन्दूपक्षेपार्थपरिमितोऽनेकप्रयोजनसंविधानरसाधिकरण उत्सङ्ग इवाङ्कः।

तत्र च-

**अनुभावविभावाभ्यां स्थायिना व्यभिचारिभिः।।३१।।**

**गृहीतमुक्तैः कर्तव्यमङ्गिनः परिपोषणम्।**

अङ्गिन एवाङ्गिरसस्थायिनः संग्रहात्स्थायिनेति रसान्तरस्थायिनो ग्रहणम्। गृहीतमुक्तैः परस्परव्यैतकीर्णैरित्यर्थः।

**न चातिरसतो वस्तु दूरं विच्छिन्नतां नयेत्।।३२।।**

**रसं वा न तिरोदध्याद्वस्त्वलंकारलक्षणैः।**

कथासंध्यङ्गोपमादिलक्षणैर्भूषणादिभिः।

**एको रसोऽङ्गीकर्तव्यो वीरः श्रृङ्गार एव वा।। ३३।।**

**अङ्गमन्ये रसाः सर्वे कर्यान्निर्वहणेऽद्भतम्।**

ननु च रसान्तरस्थायिनेत्यनेनैव रसान्तराणामङ्गत्वमुक्तम्। तन्न। यत्र रसान्तरस्थायी स्वानुभावविभावव्यभिचारियुक्तो भूयसोपनिबध्यते तत्र रसान्तराणामङ्गत्वम्। केवलस्थाथ्युपनिबन्धे तु स्थायिनो व्यभिचारितैव।

**दूराध्वानं वधं युद्धं राज्यदेशादिविप्लवम्।।३४।।**

**संरोधं भोजनं स्नानं सुरतं चानुलेपनम्।**

**अंम्बरग्रहणादीनि प्रत्यक्षाणि न निर्दिशेत्।।३५।।**

**अङ्गैर्नैवोपनिबध्नीत प्रवेशकादिभिरेव सूचयेदित्यर्थः।**

**नाधिकारिवधं क्वापि त्याज्यमावश्यकं न च।**

अधिकृतनायकवघं प्रवेशकादिनापि न सूचयेत्। आवश्यकं तु देवपिनृकार्याद्यवश्यमेव क्वचित्कुर्यात्।

**एकाहाचरितैकार्थमित्थमासन्ननायकम्।।३६।।**

**पात्रैस्त्रिचतुरैरङ्कं तेषामन्तेऽस्य निर्गमः।**

एकदिवसप्रवत्तैकप्रयोजनसंबद्धमासन्ननायकमबहुपात्रप्रवेशमङ्कं कुर्यात्। तेषां पात्राणामवश्यमङ्कस्यान्ते निर्गमः कार्यः।

**पताकास्थानकान्यत्र बिन्दुरन्ते च बीजवत्।।३७।।**

**एवमङ्काः प्रकर्तव्याः प्रवेशादिपुरस्कताः।**

**पञ्चाङ्कमेतदवरं दशाङ्कं नाटकं परम्।।३८।।**

इत्युक्तं नाटकलक्षणम्।

**अथ प्रकरणे वृत्तमत्पाद्यं लोकसंश्रयम्।**

**अमात्यविप्रवणिजामेकं कुर्याच्च नायकम्।। ३९।।**

**धीरप्रशान्तं सापायं धर्मकामार्थतत्परम्।**

**शेपं नाटकवत्संधिप्रवेशकरसादिकम्।।४०।।**

कविबुद्धिविरचितमितिवृत्तम्। लोकसंश्रयमनुदात्तममात्याद्यन्यतमधीरप्रशान्तनायकं विपन्तरितार्थसिद्धिं कुर्यात्। प्रकरणे मन्त्री अमात्य एव। सार्थवाहो वणिग्विशेष एवेति। स्पष्टमन्यत्।

**नायिका तु द्विधा नेतुः कुलस्त्री गणिका तथा।**

**क्वचिदेकैव कलजा वेश्या क्वापि द्वयं क्वचित्।।४१।।**

**कुलजाभ्यन्तरा बाह्या वेश्या नातिक्रमोऽनयोः।**

**आभिः प्रकरणं त्रेधा संकीर्णं धूर्तसंकुलम्।।४२।।**

वेशो भृतिः सोऽस्या जीवनमिति वेश्या। तद्विशेषो गणिका। यदुक्तम्-

आभिरभ्यर्थिता वेश्या रूपशीलगुणान्विता।

लभते गणिकाशब्दं स्थानं च जनसंसदि।।

एवं च कुलजा वेश्या उभयमिति त्रेधा प्रकरणे नायिका। यथा वेश्यैव तरङ्गदत्ते कुलजैव पुष्पदूषितके। ते द्वेऽपि मृच्छकटिकायामिति। कितवद्यूतकाराधूर्तसंकुलं तु मृच्छकटिकादिवत्संकीर्णप्रकरणमिति।

अथ नाटिका-

**लक्ष्यते नाटिकाप्यत्र संकीर्णान्यनिवृत्तये।**

अथ केचित्-

अनयोश्च बन्धयोगादेको भेदः प्रयोक्तृभिर्ज्ञेयः।

प्रख्यातस्त्वितरो वा नाटिसंज्ञाश्रिते काव्ये।।

इत्यमुं भरतीयं श्लोकमेको भेदः प्रख्यातो नाटिकाख्य इतरस्त्वप्रख्यातः प्रकरणिकासंज्ञो नाटीसंज्ञया हे काव्ये आश्रिते इति व्याचक्षाणाः प्रकरणिकामपि मन्यन्ते। तदसत्। उद्देशलक्षणयोरनभिधानात्समानलक्षणत्वे वा भेदाभावात्। वस्तुरसनायकानां प्रकरणाभेदात्प्रकरणिकायाः। अतोऽनुद्दिष्टाया नाटिकाया यन्मुनिना लक्षणं कृतं तत्रायमभिप्रायः। शुद्धलक्षणसंकरादेव तल्लक्षणे सिद्धे लक्षणकरणं संकीर्णानां नाटिकैव कर्तव्येति नियमार्थं विज्ञायते।

तमेव संकरं दर्शयति-

**तत्र वस्तु प्रकरणान्नाटकान्नायको नृपः।।४३।।**

**प्रख्यातो धीरललितः शृङ्गारोऽङ्गी सलक्षणः।**

उत्पाद्येतिवृत्तत्वं प्रकरणधर्मः प्रख्यातनृपनायादित्वं तु नाटकधर्म इति। एवं च नाटकप्रकरणनाटिकातिरेकेण वस्त्वादेः प्रकरणिकायामभावादङ्कपात्रभेदाद्यदि भेदः।

तत्र-

**स्त्रीप्रायचतुरङ्कादिभेदकं यदि चेष्यते।।४४।।**

**एकद्वित्र्यङ्कपात्रादिभेदेनानन्तरूपता।**

तत्र नाटिकेति स्त्रीसमाख्ययौचित्यप्राप्तं स्त्रीप्रधानत्वम्। कैशिकीवृत्याश्रयत्वाच्च तदङ्गसंख्ययाल्पावमर्शत्वेन चतुरङ्कत्वमप्यौचित्यप्राप्तमैव।

विशेषस्तु-

**देवी तत्र भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा।।४५।।**

**गम्भीरा मानिनी कृच्छ्रात्तद्वशान्नेतृसंगमः।**

प्राप्या तु-

**नायिका तादृशी मुग्धा दिव्या चातिमनोहरा।।४६।।**

तादृशीति नृपवंशजत्वादिधर्मातिदेशः।

**अन्तःपुरादिसंबन्धादासन्ना श्रुतिदर्शनैः।**

**अनुरागो नवावस्थो नेतुस्तस्यां यथोत्तरम्।। ४७।।**

**नेता तत्र प्रवर्तेत देवीत्रासेन शङ्कितः।**

तस्यां मुग्धनायिकायामन्तःपुरसंबन्धसंगीतकसंबन्धादिना प्रत्यासन्नायां नायकस्य देवीप्रतिबन्धान्तरित उत्तरोत्तरो नवावस्थानुरागो निबन्धनीयः।

**कैशिक्यङ्गैश्चतुर्भिश्च युक्ताङ्कैरिव नाटिका।।४८।।**

प्रत्यङ्कोपनिबद्धाभिहितलक्षणकैशिक्यङ्गचतुष्टयवती नाटिकेति।

अथ भाणः-

**भाणस्तु धूर्तचरितं स्वानुभूतं परेण वा।**

**यत्रोपवर्णयेदेको निपुणः पण्डितो विटः।।४९।।**

**संबधनोक्तिप्रत्युक्ती कुर्यादाकाशभाषितैः।**

**सूचयेद्वीरशृङ्गारौ शौर्यसौभाग्यसंस्तवैः।।५०।।**

**भूयसा भारती वृत्तिरेकाङ्कं वस्तु कल्पितम्।**

**मुखनिर्वहणे साङ्गे लास्याङ्गानि दशापि च।।५१।।**

धूर्ताश्चौरद्यूतकारादयस्तेषां चरितं यत्रैक एव विटः स्वकृतं परकृतं वोपवर्णयति स भारतीवृत्तिप्रधानत्वाद्भाणः। एकस्य चोक्तिप्रत्युक्तय आकाशभाषितैराशङ्कितोत्तरत्वेन भवन्ति। अस्पष्टत्वाच्च वीरश्रृङ्गारौ सौभाग्यशौर्योपवर्णनया सूचनीयौ।

लास्याङ्गानि-

**गेयं पदं स्थितं पाठ्यमासीनं पुष्पगण्डिका।**

**प्रच्छेदकस्त्रिगूढं च सैन्धवाख्यं द्विगूढकम्।।५२।।**

**उत्तमोत्तमं चैव उक्तप्रत्युक्तमेव च।**

**लास्ये दशविधं ह्येतदङ्गनिर्देशकल्पनम्।।५३।।**

शेषं स्पष्टमिति।

अथ प्रहसनम्-

**तद्वत्प्रहसनं त्रेधा शुद्धवैकृतसंकरैः।**

तद्वदिति भाणवद्वस्तुसंधिसंध्यङ्गलास्यादीनामतिदेशः।

तत्र शुद्धं तावत्-

**पाखण्डिविप्रप्रभृतिचेटचेटीविटाकुलम्।।५४।।**

**चेष्टितं वेषभाषाभिः शुद्धं हास्यवचोन्वितम्।**

पाखण्डिनः शक्यनिर्ग्रन्थप्रभृतय। विप्रश्चात्यन्तमृजवः। जातिमात्रोपजीविनो वा। प्रहसनाङ्गिहास्यविभावास्तेषां च यथावत्स्वव्यापारोपनिबन्धनं चेटचेटीव्यवहारयुक्तं शुद्धं प्रहसनम्।

विकृतं तु-

**कामुकादिवचोवेषैः पण्ढकञ्चुकितापसैः।।५५।।**

**विकृतं संकराद्वीथ्या संकीर्णं धूर्तसंकुलम्।**

कामुकादयो भुजङ्गचारभटाद्याः। तद्वेषभाषादियोगिनो यत्र षण्ढकञ्चुकितापसवृद्धादयस्तद्विकृतम्। स्वस्वरूपप्रच्युतविभावत्वात्। वीथ्यङ्गैस्तु संकीर्णत्वात्संकीर्णम्।

**रसस्तु भूयसा कार्यः षड्विधो हास्य एव तु।।५६।।**

इति स्पष्टम्-

अथ डिमः-

**डिमे वस्तु प्रसिद्धं स्याद्वृत्तयः कैशिकीं विना।**

**नेतारो देवगन्धर्वयक्षरक्षोमहोरगाः।।५७।।**

**भूतप्रेतपिशाचाद्याः षोडशात्यन्तमुद्धताः।**

**रसैरहास्यशृङ्गारैः षड्भिर्दीप्तैः समन्वितः।।५८।।**

**मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः।**

**चन्द्रसूर्योपरागैश्च न्याय्ये रौद्ररसेऽङ्गिनि।।५९।।**

**चतुरङ्कश्चतुःसंधिर्निर्विमर्शो डिमः स्मृतः।**

डिमसंघात इति नायकसंघातव्यापारात्मकत्वाड्डिमः। तत्रेतिहासप्रसिद्धमितिवृत्तम्। वृत्तयश्च कैशिकीवर्जास्तिस्त्रः। रसाश्च वीररौद्रबीभत्साद्भुतकरुणभयानकाः षट्। स्थायी तु रौद्रो न्यायप्रधानो विमर्शरहिता मुखप्रतिमुखगर्भनिर्वहणाख्याश्चत्वारः संधय साङ्गाः। मायेन्द्रजालाद्यनुभावसमाश्रयाः। शेषं प्रस्तावादि नाटकवत्। एतच्च-

इदं त्रिपुरदाहे तु लक्षणं ब्रह्मणोदितम्।

ततस्त्रिपुरदाहश्च डिमसंज्ञः प्रयोजितः।।

इति भरतमुनिना स्वयमेव त्रिपुरदाहेतिवृत्तस्य तुल्यत्वं दर्शितम्।

अथ व्यायोगः-

**ख्यातेतिवृत्तो व्यायोगः ख्यातोद्धतनराश्रयः।।६०।।**

**हीनो गर्भविमर्शाभ्यां दीप्ताः स्युर्डिमवद्रसाः।**

**अस्त्रीनिमित्तसंग्रामो जामदग्न्यजये यथा।।६१।।**

**एकाहाचरितैकाङ्को व्यायोगो बहुभिर्नरैः।**

व्यायुज्यन्तेऽस्मिन्बहवः पुरुषा इति व्यायोगः। तत्र डिमवद्रसाः षट् हास्यश्रृङ्गाररहिताः। वृत्यात्मकत्वाच्च रसानामवचनेऽपि कैशिकीरहितेतरवृत्तित्वं रसवदेव लभ्यते। अस्त्रीनिमित्तश्चात्र संग्रामः। यथा परशुरामेण पितृवधकोपोत्सहस्रार्जुनवधः कृतः। शेषं स्पष्टम्।

अथ समवकारः-

**कार्यं समवकारेऽपि आमुखं नाटकादिवत्।।६२।।**

**ख्यातं देवासुरं वस्तु निर्विमर्शास्तु संधयः।**

**वृत्तयो मन्दकैशिक्यो नेतारो देवदानवाः।।६३।।**

**द्वादशोदात्तविख्याताः फलं तेषां पृथक्पृथक्।**

**बहुवीररसाः सर्वे यद्वदम्भोधिमन्थने।।६४।।**

**चतुर्द्विनालिकावन्त्यौ नालिका घटिकाद्वयम्।**

**वस्तुस्वभावदैवारिकृताः स्युः कपटास्त्रयः।।६६।।**

**नगरोपरोधयुद्धे वाताग्न्यादिकविद्रवाः।**

**धर्मार्थकामैः शृङ्गारो नात्र बिन्दुप्रवेशकौ।।६७।।**

**वीथ्यङ्गानि यथालाभं कुर्यात्प्रहसने यथा।**

समवकीर्यन्तेऽस्मिन्नर्था इति समवकारः। तत्र नाटकादिवदामुखमिति समस्तरूपकाणामामुखप्रापणम्। विमर्शवर्जिताश्चत्वारः संधयः। देवासुरादयो द्वादशनायकाः। तेषां च फलानि पृथक्पृथग्भावन्ति। यथा समुद्रमन्थने वासुदेवादीनां लक्ष्म्यादिलाभाः। वीरश्चाङ्गी। अङ्गभूताः सर्वे रसाः। त्रयोऽङ्काः।

तेषां प्रथमो द्वादशनालिकानिवृत्तेति वृत्तप्रमाणः। यथासंख्यं चतुर्द्विनालिकावन्त्यौ नालिका च घटिकाद्वयम्। प्रत्यङ्कं च यथासंख्यं कपटाः। तथा नगरोपरोधयुद्धवाताग्न्यादिविद्रवाणां मध्य एकैकी विद्रवः कार्यः। धर्मार्थकामश्रृङ्गाराणामेकैकः श्रृङ्गारः। प्रत्यङ्कमेव विधातव्यः। वीथ्यङ्गानि च यथालाभं कार्याणि। बिन्दुप्रवेशकौ नाटकोक्तावपि न विधातव्यौ। इत्ययं समवकारः।

अथ वीथि-

**वीथी तु कैशिकीवृत्तौ संध्यङ्गाङ्कैस्तु भाणवत्।।६८।।**

**रसः सूच्यस्तु शृङ्गारः स्पृशेदपि रसान्तरम्।**

**युक्ता प्रस्तावनाख्यातैरङ्गैरुद्धात्यकादिभिः।।६९।।**

**एवं वीथी विधातव्य द्व्येकपात्रप्रयोजिता।**

वीथिवद्वीथीमार्गोऽङ्गानां पङ्क्तिर्वा भाणवत्कार्या। विशेषस्तु रसः श्रृङ्गारोऽपरिपूर्णत्वाद्भूयसा सूच्यः। रसान्तराण्यपि स्तोकं स्पर्शनायानि। कैशिकी वृत्ती रसौचित्यादेवेति। शेषं स्पष्टम्।

अथाङ्कः-

**उत्सृष्टिकाङ्के प्रख्यातं वृत्तं बुद्ध्या प्रपञ्चयेत्।।७०।।**

**रसस्तु करुणः स्थायी नेतारः प्राकृता नराः।**
**भाणवत्संधिवृत्यङ्गैर्युक्तः स्त्रीपरिदेवितैः।।७१।।**

**वाचा युद्धं विधातव्यं तथा जयपराजयौ।**

उत्सृष्टिकाङ्क इति नाटकान्तर्गताङ्कव्यवच्छेदार्थम्। शेषं प्रतीतमिति।

अथेहामृगः-

**मिश्रमीहामृगे वृत्तं चतुरङ्कं त्रिसंधिमत्।।७२।।**

**नरदिव्यावनियमान्नायकप्रतिनायकौ।**

**ख्यातौ धीरोद्धतावन्त्यो विपर्यासादयुक्तकृत्।।७३।।**

**दिव्यस्त्रियमनिच्छन्तीमपहारादिनेच्छतः।**

**शृङ्गाराभासमप्यस्य किंचित्किंचित्प्रदर्शयेत्।।७४।।**

**संरम्भं परमानीय युद्धं व्याजान्निवारयेत्।**

**वधप्राप्तस्य कुर्वीत वधं नैव महात्मनः।।७५।।**

मृगवदलभ्यां नायिकां नायकोऽस्मिन्नीहते इतीहामृगः। ख्याताख्यातं वस्त्वन्त्यः प्रतिनायको विपर्यासाद्विपर्ययज्ञानादयुक्तकारी विधेयः। स्पष्टमन्यत्।

**इत्थं विचिन्त्य दशरूपकलक्ष्ममार्ग-**

**मालोक्य वस्तु परिभाज्य कविप्रबन्धान्।**

**कुर्यादयत्नवदलंकृतिभिः प्रबन्धं**

**वाक्यैरुदारमधुरैः स्फुटमन्दवृत्तैः।।७६।।**

स्पष्टम्।।

**इति श्रीविष्णुसूनोर्धनिकस्य कृतौ दशरूपावलोके रूपकलक्षणप्रकाशो नाम तृतीयः प्रकाशः समाप्तः।**

*****